# श्रीमद् भागवत रसिक कुटुंब

## ॥ कैवल्याष्टकम् ॥

मधुरं(म्) मधुरेभ्योऽपि, मं(ङ्)गलेभ्योऽपि मं(ङ्)गलम् ।
पावनं(म्) पावनेभ्योऽपि, हरेर्नामैव केवलम् ॥ 1॥

आब्रह्मस्तम्बपर्यन्तं(म्), सर्वं(म्) मायामयं(ञ्) जगत् ।
सत्यं(म्) सत्यं(म्) पुनः(स्) सत्यं(म्), हरेर्नामैव केवलम् ॥ 2॥

स गुरुः(स्) स पिता चापि, सा माता बान्धवोऽपि सः ।
शिक्षयेच्चेत्सदा स्मर्तुं(म्), हरेर्नामैव केवलम् ॥ 3॥

निः श्वासे न हि विश्वासः(ख्), कदा रुद्धो भविष्यति ।
कीर्तनीयमतो बाल्याद्- धरेर्नामैव केवलम् ॥ 4॥

हरिः(स्) सदा वसेत्तत्र, यत्र भागवता जनाः ।
गायन्ति भक्तिभावेन, हरेर्नामैव केवलम् ॥ 5॥

अहो दुःखं(म्) महादुखं(न्), दुःखाद् दुःखतरं(यँ) यतः ।
काचार्थं(वँ) विस्मृतं(म्) रत्नं(म्), हरेर्नामैव केवलम् ॥ 6॥

दीयतां(न्) दीयतां(ङ्) कर्णो, नीयतां(न्) नीयतां(वँ) वचः ।
गीयतां(ङ्) गीयतां(न्) नित्यं(म्), हरेर्नामैव केवलम् ॥ 7॥

तृणीकृत्य जगत्सर्वं(म्), राजते सकलोपरि ।
चिदानन्दमयं(म्) शुद्धं(म्), हरेर्नामैव केवलम् ॥ 8॥

॥ इति श्रीकैवाल्याष्टकं सम्पूर्णम् ॥